त्तव मुद्रिकाम् । भ्रमद्धोचितरङ्गाढ्ये ध्यानखसर्गगोचरे । परीक्षेदाद्रपर्णेन चटत्कारसबोधकमिति" । ततः प्राड्विवाको धर्मावाहनादिपत्रारोपणान्तं साधारणं कर्म कृत्वा घृतमभिमन्त्रयेत् । मन्त्रस्तु तेनैव दर्शितः "तत-स्थानेन मन्त्रेण सकृत्तदभिमन्त्रयेत् । परं पवित्रममृतं घृत ! त्वं यज्ञकर्मसु । दह पावक ! पापं त्वं हिमशीतो भवेति च" । ततः प्राड्विवाकः शोध्येन "त्वमग्ने ! सर्वभूतानामित्यादि मन्त्रेणाभिमन्त्रणं कारयित्वा मुद्रिकां ग्राहयेदित्याह स एव "उपोषितन्ततः स्नातमार्द्रवासःसमाहृतम् । ग्राहयेन्मुद्रिकान्तान्तु घृतमध्यगतान्तथा । प्रदेशिनीं च तस्याथ परीक्षेयुः परीक्षकाः" इति । अत्र तर्जन्यैव मुद्रिकोद्धरणं कार्य्यं तस्याः परीक्षाभिधानात् पक्षद्वयेऽपि शुद्ध्यवधारणोपायं बृहस्पतिराह "कराग्रं येन धुनुयात् विस्फोटो वा न जायते । शुद्धो भवति धर्मेण पितामहवचो यथेति" । कालिकापुराणेऽपि "न धुनेयुः कराग्रन्तु यस्य रक्तं न जायते । विस्फोटाद्यैस्तथा दोषैः स शुद्धो यस्य नोद्गतमिति" । रक्तं रक्तवर्णम् । यस्य कराग्रं विस्फोटाद्यैर्नोद्गतमित्यन्वयः । पितामहोऽपि "यस्य विस्फोटका न स्युः शुद्धोऽसावन्यथाऽशुचिरिति" । तण्डुलपरीक्षाशब्दे अधिकं द्रष्टव्यम् ।

**तप्तमुद्रा** स्त्री वैष्णवैः शरीरधार्य्योऽग्नितप्तधातुमयमुद्राकृतभगवदायुधचिह्नं तद्विधिः हरिभक्तिविलासे १५ विलासे । "आषाढ़शुक्लद्वादश्यां हरौ शिशयिषौ सति । वैष्णवः पारणं कृत्वा तप्तमुद्राश्च धारयेत् । ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैकान्तितद्धये । कुर्व्वन्नात्मार्पणं तप्तमुद्राभिर्देहमङ्कयेत्" । तप्तमुद्राधारणं वाराहे तप्तमुद्राप्रसङ्गे "चक्रादिधारणं पुंसां परं सम्बन्धवेदनम् । पातिव्रत्यनिमित्तं हि वलयादिविभूषणमिति" । तप्तमुद्राधारणफलं वायुपुराणे "अग्निनैव च सन्तप्तं चक्रमादाय वैष्णवः । धारयेत् सर्ववर्णानां हरिसालोक्यसिद्धये" । ब्रह्माण्डे "कृत्वा धातुमयीं मुद्रां तापयित्वा स्विकां तनूम् । चक्रादिविहितां भूप धारयेद्वैष्णवो नरः" । नारदीयपञ्चरात्रे "द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम् । हरेः सुदर्शनं तप्तं धारयेत्तु विचक्षणः । सौपर्णे च श्रीभगवद्गरुड़संवादे तप्तमुद्राप्रकरणे "गरुत्मन्नविशेषेण सर्ववर्णेष्वयं विधिः । विप्रो वा क्षत्रियो वापि वैश्यः शूद्रस्तथैव च" । पाद्मे "अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा । ब्राह्मणस्य तथैवेदं तप्तचक्रादिधारणम्" । किञ्च तत्रैवोत्तरखण्डे श्रीशिवोमासंवादे "शङ्खचक्राङ्कनं कुर्य्याद्ब्राह्मणो बाहुमूलयोः । हुताग्निनैव सन्तप्य सर्वपापापनुत्तये" । "चक्रं वा शङ्खचक्रे वा तथा पञ्चायुधानि वा । धारयित्वैव विधिवद्ब्रह्मकर्म समारभेत्" । तदकरणे निन्दा तत्रैव "अधृत्वा विधिना चक्रं ब्राह्मणः प्राकृतो भवेत् । न तस्य किञ्चिदश्नीयादपि क्रतुसहस्रिणः । सर्ववेदविदो वापि सर्वशास्त्रविशारदः । अधृत्वा विधिना चक्रं ब्राह्मणः पतितो भवेत् । तप्तेनैवाङ्कनं कुर्य्यात् ब्राह्मणस्य विधानतः । श्रौतस्मार्त्तादिसिद्ध्यर्थं मन्त्रसिद्ध्यै तथैव च । हरेः पूजाधिकारार्थं चक्रं धार्य्यं विधानतः । वैष्णवत्वस्य सिद्ध्यर्थं भक्तिसिद्ध्यै विशेषतः । उपवीतादिवद्धार्य्याः शङ्खचक्रादयस्तथा । ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः" । श्रुतयश्च "यो ह वै सुशोक्रमौलेर्धर्म्मानुतिष्ठमानोऽग्निना चक्रं धत्ते । अग्निर्वै सहस्रारः सहस्रारो नेमिर्न्नेमिना तप्ततनुः सायुज्यं सलोकतामाप्नोतीति" । "चक्रं बिभर्त्ति वपुषाभितप्तं वलं देवानाममृतस्य विष्णोः । स एति नाकं दुरितं विधूय विशन्ति यद्यतयो वीतरागाः" इति । बह्वृकपरिशिष्टे "अतप्ततनुर्न तदामो अश्नुतेऽश्नुता सह इद्वहन्तस्तत् समासतेति" यजुषि ऋग्वेदीयाश्वलायनशाखायाञ्च । "प्रतद्विष्णोररचक्रे सुतप्ते जन्माम्भोधिं वर्त्तते चर्षणीन्द्राः । मूले बाह्वोर्द्धतेऽन्ये पुराणलिङ्गान्यन्ये तप्तान्यायुधान्यर्पयन्ते" इति । छन्द सक् परिशिष्टे "सहोवाच याज्ञवल्क्यस्तत् पुमानात्महिताय प्रेमृणा हरिं भजेत् । सुशोकभं मौलेर्धर्म्मो यस्य त्वग्निनाधत्ते" इति । शतपथी श्रुतिः अथर्वपरिशिष्टे तप्तचक्रादिप्रकरणे "देवासो एवैतेन बाहुना सुदर्शनेन प्रयताः स्वर्गमायन्" । "येनाङ्किता मनवो लोकसृष्टिं वितन्वते ब्राह्मणास्तद्वहन्तीति" । पाद्मे तप्तमुद्राप्रसङ्गे "विष्णुचक्राङ्कितं विप्रं पूजयेत् सर्वकर्म्मणि । विष्णुचक्रविहीनन्तु प्रयत्नेन विवर्जयेत्" । नारदीये "तप्तमुद्राप्रसङ्गे "श्रीकृष्णचक्राङ्कविहीनगात्रः श्मशानतुल्यः पुरुषोऽथ नारी, । दृष्ट्वा नरस्तं नृपते ! सवासाः स्नात्वा समर्चेद्धरिमङ्घ्रि सद्यः" इति । बहवश्च वेङ्कटाचार्यपादप्रभृतिभिर्बुधैः । श्रुतयः स्मृतयोह्यत्र विख्याता